# बोर्ड कृतिपत्रिका : फेब्रुवारी 2026

## आनन्द : (संयुक्त - संस्कृतम्)

**Time: 2 Hours** **Marks: 40**


**सूचना :**

(1) सूचनानुसारम् आकृतयः आरेखितव्याः।
(2) आकृतीनाम् आरेखनं मसीलेखन्या कर्तव्यम्।
(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।

### प्रथमः विभागः – सुगमसंस्कृतम् (6)

**1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (4 तः 3)** **[3]**

(1) 

(2) 

(3) 

(4) 

**(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2)** **[2]**

(1) ६२ (2) पञ्चाशत्। (3) ८०

**(इ) समय-स्तम्भमेलनं कुरुत।** **[1]**

| 'अ' | 'आ' |
|---|---|
| (1) पञ्चाधिक-एकादशवादनम् | ३.०० |
| (2) त्रिवादनम् | ११.०५ |
| | ४.४५ |

### द्वितीयः विभागः – गद्यम् (14)

**2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[4]**

पिता - सम्यग् उक्तं त्वया। यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरः भागः प्राप्तुं न शक्यते सः एव परमः अणुः।

अर्णवः - द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु?

पिता - सत्यम्, अयं खलु कणादमहर्षेः सिद्धान्तः। अपि जानासि? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम्। तदपि प्रायः ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके।

अर्णवः - तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये? वयं तु केवलं तस्य महाभागस्य नामधेयम्, एव जानीमः।

| | | |
|---|---|---|
| पिता | - | कणादमुनिना प्रतिपादितम् - परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता। |
| अर्णवः | - | का सा व्याख्या? |
| पिता | - | जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः।<br>तस्य षष्ठतमो भागः परमाणुः स उच्यते।। |
| अर्णवः | - | अहम् एतद्विषये विस्तरेण पठितुम् इच्छामि। |
| पिता | - | उत्तमम्! श्वः मम महाविद्यालयम् आगच्छ। तत्र कणादविषयकाणि नैकानि पुस्तकानि सन्ति। तव जिज्ञासा निश्चयेन शाम्येत्। |

**(1) अवबोधनम्। (3 त: 2)** **2**

(क) **उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

पिता अर्णवाय स्वमहाविद्यालयम् आगन्तुं कथयति यतः ........................... ।

(1) पितुः महाविद्यालये कणादविषयकाणि पुस्तकानि सन्ति ।

(2) पितुः महाविद्यालये स्नेह-सम्मेलनम् अस्ति।

(ख) **पूर्णवाक्येन उत्तरं लिखत।** 1

कणादमुनिना कस्मिन् ग्रन्थे परमाणोः व्याख्या कृता?

(ग) **वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

परमाणुः द्रव्यस्य मूलकारणम्।

**(2) शब्दज्ञानम्। (3 त: 2)** **2**

(क) **गद्यांशात् 2 हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये चित्वा लिखत।** 1

(ख) **गद्यांशात् विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (1) | अन्तिमः | शतके |
| (2) | पञ्चमे | अणुः |
| | | घटकः |

(ग) **पूर्वपदं / उत्तरपदं लिखत।** 1

(1) तदपि = ............... + अपि।

(2) स उच्यते = सः + ............... ।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः। सः ग्रामः पूर्णानदीतीरे वर्तते। तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान्। पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत। माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म। परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता। एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः।



Target Publications

**(1) अवबोधनम्। (3 त: 2)** **2**

(क) **पूर्णवाक्येन उत्तरं लिखत।** 1

गुरुमुपगम्य शङ्करः किम् अधीतवान्?

(ख) **वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।** 1

एकस्मिन् दिने शङ्करः स्नानार्थं शरयूनदीं गतः।


(ग) **अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** 1

बाल्ये एव तस्य <u>पिता</u> शिवगुरुः दिवङ्गतः।

**(2) पृथक्करणम्।** **2**

स्थानाधारेण शब्दपेटिकां पूरयत।

(कालडिग्रामः, केरलप्रदेशः, भारतदेशः, आलुवानगरम्)



(इ) **गद्यांशं पठित्वा सरलार्थं लिखत। (2 त: 1)** [4]

(1)

वैखानसः - (राजानम् अवरुध्य) राजन्! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम्।

दुष्यन्तः - प्रतिसंहृत एषः सायकः। (यथोक्तं करोति।)

वैखानसः - राजन्! समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते ।

(2)

नदी (विपाट्) - किम्? एषः मर्त्यः मां माता इति सम्बोधयति?

नदी (शुतुद्री) - कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु! किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति?

विश्वामित्रः - न हि मातः, नैतत् शक्यम्।<br>सर्वाः सरितः सुखं वहन्तु ।<br>सर्वे जनाः सुखिनः सन्तु।।

(ई) **माध्यमभाषया उत्तरं लिखत। (2 त: 1)** [2]

(1) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

(2) 'स नरः शत्रुनन्दनः' इति वचनं कथायाः आधारेण स्पष्टीकुरुत।

**तृतीयः विभागः- पद्यम्।** (10)

3. (अ) **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (5 त: 4)** [4]

यथैव सकला नद्यः प्रविशन्ति महोदधिम्।<br>तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।

यत्र विद्वज्जनो नास्ति श्लाध्यस्तत्राल्पधीरपि ।<br>निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।।

Target Publications

> यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
> तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।
>
> उत्तमो नातिवक्ता स्यादधमो बहु भाषते ।
> सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते।।

(क) **पूर्णवाक्येन उत्तरं लिखत।** 1

क: बहु भाषते ?

(ख) **विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|
| (1) | सकलाः | अल्पधीः |
| (2) | श्लाघ्यः | सुवर्णम् |
| | | नद्यः |

(ग) **जालरेखाचित्रं पूरयत।** 1




(घ) **पद्यांशात् 2 प्रथमा-विभक्त्यन्तपदे चित्वा लिखत।** 1

(च) **पूर्वपदम्/उत्तरपदं लिखत।** 1

(1) एरण्डोऽपि = एरण्डः + .......................... ।

(2) नातिवक्ता = .......................... + अतिवक्ता।

(आ) **पद्ये शुद्धे पूर्णे च लिखत। (3 त: 2)** **[4]**

(1) घटं .......................................................... भवेत्।।

(2) यादृशं .......................................................... फलम्।।

(3) अल्पानामपि .......................................................... मत्तदन्तिनः।।

(इ) **माध्यमभाषया सरलार्थं लिखत। (2 त: 1)** **[2]**

(1) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः।।

(2) षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः।।

## चतुर्थः विभागः- भाषाभ्यासः। (10)

4. (अ) **पृथक्करणम्।** **[4]**

(1) **मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत। (5 त: 4)** 2

| **नाम** | **सर्वनाम** |
|---|---|
| | |

(**मञ्जूषा** – लगुडेन, तानि, विश्वम्, सर्वेषाम्, कविः)

Target Publications

(2) **मञ्जूषातः क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 त : 4)** 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(**मञ्जूषा** – भूषयति, आरब्धः, दृष्टम्,त्यजतु, खादितव्या)

(आ) **निर्दिष्टाः कृतीः कुरुत। (4 त : 2)** [4]

**(1) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 त : 2)** 2

(क) भवने मम गृहं ............................................ तले वर्तते। (सप्तमे/सप्ते)

(ख) ............................................ वेदाः वर्तन्ते । (चत्वारि/चत्वारः)

(ग) दिनस्य ...................... लोकयानम् आगच्छति । (नववारं/नवम्)

**(2) समासविग्रहाणां समासनामभिः सह मेलनं कुरुत। (6 त : 4)** 2

| समासविग्रहः | समासनाम |
|---|---|
| (1) धनं च धान्यानि च। | कर्मधारयः। |
| (2) स्थूलः पुरुषः। | सप्तमी-तत्पुरुषः। |
| (3) न इच्छा। | बहुव्रीहिः। |
| (4) क्षुद्रा बुद्धिः यस्य सः। | उपपद तत्पुरुषः। |
| (5) दारपोषणे रताः। | नञ्-तत्पुरुषः। |
| (6) पादैः पिबति इति। | इतरेतर-द्वन्द्वः। |

**(3) मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत।** 2

(1) सूर्यः = .............................। (2) सद्गुणाः × .............................।

(3) नदी = .............................। (4) उपकारकम् × .............................।

(**मञ्जूषा** – सरित्, दुर्गुणाः, अपकारकम्, भास्करः)

**(4) योग्यं पर्यायं चिनुत। (3 त : 2)** 2

(1) धीराः न्याय्यात्पथः पदं न प्रविचलन्ति। (कर्तृवाच्यम्/कर्मवाच्यम्)

(2) त्वं ..................... । (स्मरिष्यसि/स्मरिष्यति)

(3) वानराः..................... फलानि खादन्ति। (मधुराः / मधुराणि)

(इ) **विशिष्ट-विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 त : 2)** [2]

(क) गम्-गच्छ् (1 प.प.) (ख) दा-यच्छ् (1 प.प.)

(ग) अलम् (घ) नमः

Target Publications